- Title – श्री चं. टीका (दुर्गा स्तुति सम्बन्धित)
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – अजरे अदिनश्वपरोनित्य नूतने
- End – तडाक्षकपदामा ——
- Colophon-
- Illustrations -
- Source -
- Subject - धर्म सम्बन्धित
- Revisor -
- Author -

1. Remarks-

पृष्ठ = 1-16, 26-28, 30, 35-37, 40

4981

अजरे अविनश्वरे नित्ये अम्लाने नूतने ॥ अंबरे वाससी क्षीरोदः समुद्र इत्यन्वयः कर्णिका निवला यानु ॥२४॥ केयूराः अंग
दानि ॥ अंगदं वापि केयूरं पुन्नपुंसकयोर्मतामित्यभिधानात् ॥ नूपुरो दसकौ ॥ ग्रैवेयकं ग्रीवाभरणं अनु
त्तमं ॥ न विद्यते उत्तमो यस्मात् ॥२५॥ अंगुलीयकरत्नानि अंगुलीयकमूर्मिकामुद्रिकानि ॥२६॥ अनेकोत्तमा
नि वकुलमालानि अम्लानपंकजं सम्मेषां दर्शनकिवच चूडामण्यादिकं विश्वकर्मा ददाविति अन्वयः ॥ अम्लानानि

क्षीरोदस्त्वमलं हारमजरे चाम्बरे तथा वरे ॥ चूडामणिं तथा दिव्यं कुंडले कटकानि च ॥२४॥ अर्धचन्द्रं तथा
शुभ्रकेयूरान् सर्वबाहुषु ॥ नूपुरौ विमलौ दिव्यौ ग्रैवेयकमनुत्तमम् ॥२५॥ अंगुलीयकरत्नानि समस्तास्व
गुलीषु च ॥ विश्वकर्मा ददौ तस्मै परशुं चातिनिर्मलं ॥ २६॥ अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनं ॥
अम्लानपंकजां मालां शिरस्युरसि चापरां ॥२७॥ अददज्जलधिस्तस्मै पंकजं चातिशोभनं ॥ हिमवान्वाह
नं सिंहं रत्नानि विविधानि च ॥२८॥ ॥ ॥ ॥ ॥ ॥

म्लानहीनानि नैर्मल्यानि पंकजानि यस्यां सा सरदपं ॥२७॥ अददत् ददातेः लङ् आत्मनेपदिनोऽपि छान्दसं लङ् ॥
परस्मैपदं एवं युयुधुरिति न चोत्पः स्यंतिचापर इतिनिरीक्षिणं मियन्मुनीनितियथा परस्मैपदे लाः
नेपदं यथा भवेत्तथा सर्वदा किंकर इति बध्वा वान्या नकथ्यिते तिरवज्रे नरेनेर कृतं ॥ प्राप्स्य नेसत्य
रि यरुत्न स्वरा जं प्राप्स्यते भवानिति ॥२८॥ ॥ ॥ ॥ ॥

लक्ष्मीः सरस्वती वाग्देवतेऽवरे श्रेष्ठे भूतिसत्त्वं कारणं कार्योपचारात् उद्योगद्युतिसात्विकी वा
[illegible] बभ्रुरा देन रक्तो गुणो विवक्ष्यते तद्योगात् बाभ्रवी राजसी त्यर्थः मसी तमोगुणवती अथवा भू
दुर्गेति तरो तरसंपत् बभ्रुः शाको दुर्गाभूतीत्यर्थः अयमाह भूति देवयोनिः बाभ्रवी वैष्णवी विष्णोन
[illegible] विष्णोर्बभ्रुनामकत्वात् [illegible] नामसीनिद्रा [illegible] दसा तादेताभावः निय

मेधे सरस्वति वरे भूति बाभ्रवि तामसी नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते २२ सर्वस्वरूपे सर्वेशे स
र्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते २३ एतत्ते वदनं सौम्यं लोचनत्रयभू
षितं पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते २४ ज्वालाकरालमत्युग्रमशेषासुरसूदनं
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते २५ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् सा
घंटा पातु नो देवि पापेभ्योऽनः सुतानिव २६

[illegible] कात्याय
नि कात्यायनी [illegible] २४ भीतेर्यावत् २५ तस्मात् पापेभ्यः प्रतिकूलेभ्यः [illegible] अन
[illegible] इत्यतो [illegible] इति केचित् सुतानपत्यानि यद्वा नो स्माकं पापेभ्यो नो अस्मान् पातु यद्वा
अनः शकटस्तु [illegible] अनः शकटमातरिव यथा [illegible]
[illegible] सुतानिव नः कौटिल्यो त्यरति कर्त्तरि क्विप् २६

श्रीदं·टी·
२७

दे॰
मु॰
५

दुर्गायै दुर्गमायै । नत्यर्थानां ज्ञानार्थत्वात् दुर्गं संकटं पापार्ययति पालयतीति दुर्गपारा दुर्गपारस्य प
रिच्छेदस्याभावात् देशकालवस्तुपरिच्छेदरहिता यद्वा दुर्गं संसारात् पारयति पारं करोतीति वा तस्यै सारा
यै सारो बलं तद्योगिन्यै सर्वकारिण्यै समस्तकार्यजातस्य कर्त्र्यै १० ख्यातिर्यशस्तदनुभूतिस्तद्
पुरुषख्यातिरित्यर्थः तद्रूपायै कृष्णधूम्रयोगिन्यै ११ अतिसौम्यायै विद्यारूपेण संसारतापरिच्छे
द हेतुत्वात् अतिरौद्रायै अविद्यारूपेण संसारकारणत्वात् जगत्प्रतिष्ठायै देव्यै कृत्यै कृत्या

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः॥ १० अतिसौ
म्यातिरौद्रायै नतास्तस्यै नमो नमः नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ११ या देवी सर्वभूतेषु विष्णु
मायेति शब्दिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १२ या देवी सर्वभूतेषु चेतनेत्यभिधीयते॥
नमस्तस्यै १३ बुद्धि १४ निद्रा १५ क्षुधा १६ छाया १७ शक्ति १८ तृष्णा १९ क्षान्ति २० जाति २१
लज्जा २२ शान्ति २३

र्थ कायै १२ सर्वभूतेषु सर्वेषु प्राणिषु या प्रथा प्रसिद्धा विष्णुमाया मूलविद्या इति शब्दरूपदर्शने
शास्त्रेषु प्रतिपादिता तस्यै नमो विष्णुमायादिसात्विकराजसतामसतया त्रिविधाभिधीयते इति
नवरात्रमर्चितस्य पदं त्रिरभ्यस्यते नमः पदं तु ब्रह्मादेः संभ्रमेण तदुक्तं विषादे विस्मये हर्षे दैवे दै
वधारणे प्रसादने प्रश्ने च एकस्यानेकनमस्कारो यथा त्रिस्त्रिः प्रदक्षिणमिति पदत्रयेनैकार्थिकत्वा
त्क्रमानुसरति नमस्कारत्रयं दर्शितं विष्णुमाया चेतना बुद्धिर्निद्रा क्षुधा छाया शक्तिस्तृष्णा
क्षान्तिर्जातिर्लज्जा शान्तिः श्रद्धा कान्तिः लक्ष्मीः स्मृतिः तथा धृतिस्तुष्टिर्दया ततो तुष्टिर्बुद्धि

श्रीदे॰टी॰
२७

५

5

रत्नानि भुंजते इति रत्नभुजः ६५ उरुविक्रमं विक्रमातिशयमभुजं भज अत्र अथ चंचलौ चपलस्व
भावावपांगौ नेत्रांतौ यस्याः वै यस्मात् ६६ तत्परिग्रहात् मदङ्गीकारात् ॥ परिग्रहतां पत्नीत्वं ६७

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयं। ६५ मां
वा ममानुजं वापि निशुंभमुरुविक्रमं भज त्वं चंचलापांगि रत्नभूतासि वै यतः ६६ परमैश्व
र्यमतुलं प्राप्स्यसे मत्परिग्रहात् एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ऋषिरुवाच ॥

श्री वं· दौ· इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् श्रीदे

३· व्युवाच सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितं त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि
तादृशः ६८ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथं श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या
पुरा कृता ७० यो मां जयति संग्रामे यो मे दर्पं व्यपोहति यो मे प्रतिबलो लोके स मे भर्त्ता भ
विष्यति ७१

गंभीरमंतरे स्मितं यस्याः जगौ उक्तवती भगवती अचिंत्यमहत्त्वा ६८ ६९ प्रतिज्ञानं सं
कल्पितं अल्पबुद्धित्वादिति सरोषोक्तिः पुरा पूर्वं मायेसुतीत्यर्थः जयति बलेनाभिभवति य
दर्पं बलं वा अभिमानं व्यपोहति प्रतिबलः समानसामर्थ्यः तस्मात्यागेन ज्ञोतु विवादं करोतु ७१

शानुगा रह उद्दिधाधिन: वशाप्याय ताः अनुगाश्चातिकर्मधार्यैव पयगिंद्राद्य षि कारभेदेन ६१
स्त्रशेषतो शेषाणि गजरत्नानि नानादिग्देशप्रसिद्धानि मम वश्यानीति अनुषज्यते तदश्वर
लं रहनासमानीय अमरै मम समर्पितमित्यन्वयः उच्चैः श्रवसंज्ञमिति नेरुक्तो वर्णागमः

मम त्रैलो क्यमखिलं मम देवा वशानुगाः यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ६१
त्रैलो क्ये वरर त्नानि मम वश्यान्यशेषतः तथैव गजरत्नानि हृत्वा देवेन्द्रवाहन ६२ क्षीरो
दमथनोद्भूतमश्वरत्नममामरैः उच्चैःश्रवसंज्ञं तु प्रणिपत्य समर्पितं ६३ यानि चान्या
नि देवेषु गन्धर्वेषूरगेषु च रत्नभूतानि भूतानि तानि मय्येव शोभने ६४

यहु रा ग्नादेरा कृतिगण हात् पाक्षिकोऽत् यथा हरिवंशे आकाशस्यादित्तो कसेरिति भू
तानि प्राप्तानि स्थितानि वा शोभन हे ६४ ॥ ॥ ॥ ॥ ॥

10

भैरवमुग्रं शासनमाज्ञया यस्याः महत्तिसैन्यानि यन्त्रेतिमहासैन्यं सेनानां समुदायः तेषां सहस्रैः ६
धरणि गगनयोरंतरं मध्यं ७ अतीवमत्यर्थमनेन इति यावत् उपबृंहयत् अवर्द्धयत् आ
गमशासनस्यामित्यलात् अनुभावः धनुर्ज्या इति स्वभावाख्यानमंत्रं जापदेनैव धनुर्गुणप्रतीते
धनुर्ज्यादीनां नादैरापूरितं दिङ्मुखं यया विनादैर्जनादेजिग्ये जितवती नादानित्यन्वयः

इत्याज्ञाप्यासुरपतिः शुंभो भैरवशासनः निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ६ आया
तं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं ज्यास्वनैः पूरयामास धरणीगगनान्तरं ७ ततः सिंहो महा
नादमतीव कृतवान्नृप घंटास्वनेन तान्नादमंबिका चोपबृंहयत् ८ धनुर्ज्यासिंहघंटानां नादा
पूरितदिङ्मुखा विनादैर्भीषणैः काली जिग्ये विस्तारिताननाः ९ तं निनादमुपश्रुत्य दैत्यसैन्यै
श्चतुर्दिशं देवी सिंहस्तथा काली सरोषैः परिवारिताः १० ॥ ॥ ॥

वात्याघेव कुलमित्यानंद लोके कर्बलां व वत्स्याम बभूवतां शब्दापूरितदिङ्मुखा पिकाली देवा
सिंह घंटानां निनादे जिग्ये इति कश्चित् चतुर्दिशः कालीकलाटभवा सरोषैः सक्रोधैः शारै
घोरितिदापाठ १०

दोत्येन नूतभावेन स्वत्वदूतवाणी भांवेतियति प्राप्ते कदुन्दर्भो भवोपियरापप्रत्ययः २६ २७ ते असुभादयः स
र्वा स्वात्ते शिवेन कथिते ताल योषशकारः शार्वः सर्वइति व्यवस्थापनात् यतोयत्र सार्वे विभक्तिक
स्तुति २८ प्रथमा दो अग्रे संमुखे शरः शाक्तिः ऋष्टिः खड्ग एव च ऽशिस्तोरुद्र तऽद्र तोऽमर्थ ये

वलावलेपादथवे असुवं तो युद्धकांक्षिणः तदागहत्तन यांतु मद्धुवापिसितेनव: २६ यतो नियु
क्तो दोत्येन तया देव्याः शिवः स्वयं शिवदूतीति लोकेस्मिं स्ततः साख्यातिमागता ते पि श्रुत्वाव
चो देव्याः सर्वास्यातमहासुराः अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता २८ ततः प्रथम
येवाग्रे शरशक्त्यृष्टि वृष्टिभिः ववर्षुरुद्धतामर्षास्तां देवीममरारयः २९ सा च तान्प्रहितान्
बाणान् शूल शक्ति परश्वधान् ॥ चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ३० तस्याग्रतस्त
था काली शूलपातविदारितान् खट्वांगपोथितांश्चारीन्कुर्वती व्यचरत्तदा ३१ ॥ ॥

वं० ववर्षुरिति जिनमा निर्दिष्टा ताडुत्पन्भावः ववर्षुरिति वापाठः परश्वधान्परशूनित्यर्थः आ
ध्मातं शब्दवद्धनुस्तेन मुक्तैः ३० तस्या देव्या अग्रतः इति क्वचिद्विसर्गलोपे पदसंधिः तस्या
लोका अग्रतः इति पाठः पोथितान्नाम दितान् कुर्वतीति वैकल्पिकोनुभाव: सर्वे विधयः छंदसि
विकल्प्यन्ते इति न्यायात् कुर्वतीति वा पाठः ३१

यज्ञसंकल्पितसूकराकारं यथा ... रित्यर्थः वाराहाकारं रूपं मूर्तिं बिभ्रती धारयती १८ वपुः शरीरं सटा के-
सरास्ताभिः क्षेपेण तिरस्कृता नक्षत्रसंहतिर्यया गजराजोपरि ऐरावतपृष्ठे प्राप्ता आगता २० असु-
रा हन्यन्तामित्याह इति साध्याहारोऽन्वयः २१ शिवाशतनिनादिनी श्रृगालशतनादेनान्विता २२

यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुं १८ नारसिंही नृ-
सिंहस्य बिभ्रती सदृशं वपुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्ता तथैवैन्द्री गज-
राजोपरि स्थिता प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा २० ततः परिवृतस्ताभिरीशानो देवश-
क्तिभिः हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकां २१ ततो देवीशरीरात्तु विनिःक्रान्तातिभीषणा ॥
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी २२ सा चाह धूम्रजटिलमीशानमपराजिता दूत त्वं गच्छ
भगवन् पार्श्वं शुम्भनिशुम्भयोः ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ये चान्ये दानवास्तत्र युद्धाय
समुपस्थिता २४ त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः यूयं प्रयात पातालं यदि जीवितुमि-
च्छथ २५

धूम्रजटिलं धूम्रवर्णजटाशालिनं दूत त्वं दूतो भूत्वा ... रस्ता भावं गच्छेति काकाक्षिवत्संबंधः तत्र शुं-
भनिशुंभाविति ... पुनरागत्य गच्छत २३ ॥२४॥ मम प्रिया: मदीयशृगाला: वो युष्माकं पि-
शितेन मांसेन २५ ॥ ॥ ॥

अस्य रक्तबीजस्य मेदिनीपातावधिकरणे सप्तमीपंचम्याः पाठे तल्यब्लोपेऽधिकरणे चोपसंख्यानं कृते
यामिति पंचमी तल्यबादानं तन्यर्थे कर्तुः प्रकृतिरिति पादानात् नेवात्र मेदिनी प्रकृतिः इति
विंदोरेव यथा ह्राले रक्तबीजः ४० ४१ ४२ वीर्यप्रभावः वेर्तं स्थौल्यं विक्रमः सामर्थ्या

पलायनपरा इह शुद्धदेव्याः समातृगणार्दितान् यो युद्ध्यमानायस्यो कुद्धो रक्तबीजो महासुरः ३९
रक्तविंदुर्यदा भूमौ पतत्यस्य शरीरतः समुत्पतति मेदिन्यां तत्प्रमाणो महासुरः ४० युयुधे
स गदापाणिरिंद्रशक्त्या महासुरः ततश्चैंद्री स्ववज्रेण रक्तबीजमताडयत् कुलिशेना
हतस्याशु बहु सुस्राव शोणितं समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ४२ ॥
यावंतः पतितास्तस्य शरीराद्रक्तबिंदवः तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ते
चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः समं मातृभिरत्युग्रशस्त्रपातातिभीषणं ४४
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ४५

तिशयः ४३ समं सह अत्युग्रमिति क्रियाविशेषणं शस्त्रास्त्रस्य विशेषणं वा ४४
ववाह्रुधिरं भावे इंदसः संप्रसारणाभावः वहगताविति लोलोवा रूपं कात्यप्रत्ययलक्ष्य तोका धातो
रनेकार्थत्वात् इत्येवं बहु इति शाद्मोदहशीवा त्तो रक्तात्सहस्रशः संख्याः समेरले वैसमी

वीर्यहतं स्त्रीजोऽवष्टम्भः येन येन प्रदेशेन स्म धावति इति स्म शब्दयोरतीतवर्त्तमानता: येन तेन ब्रा
ह्मणी येन येनाधावत् तेन तेना शत्रूणां धावाकरोदित्यर्थः ३२ ३३ ऐन्द्र्याः कुलिशपातः तेन ३५

कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणी चाकरोच्छत्रून्येन येनास्म धावति ३१ माहे
श्वरी त्रिशूलेन तथा चक्रेण वैष्णवी दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ३३ ऐन्द्री
कुलिशपातेन शतशो दैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ३४ तुंडप्रहार
विध्वस्तादंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ३५ नखैर्विदारितांश्चा
न्या भक्षयंती महासुरान् नारसिंही चचाराजौ नादापूर्णदिगंबरा ३६ चंडाट्टहासैरसुराः
शिवदूत्यभिदूषिताः पेतुः पृथिव्यां पतितां तांश्चखादाथ सा तदा ३७ इति मातृगणं क्रु
द्धं मर्दयंतं महासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ३८ ॥ ॥ ॥

सर्वे रक्तो स्वं वरमाकाशं ३६ चंडाट्टहासैः सकोपो वा अट्टहासैः शिवदूत्यभिदूषिताः सा शि
वदूती विविधैरभ्युपायैः महामहासुरान्मर्दयंतं मातृगणं दृष्ट्वा नष्टाः इति ताम्भुपायविशेष
एं देवारपयद्दिपुः ३८ ३९

आपतत: आगच्छत: २१ वेगाविद्धेन अत्यर्थं भ्रामितेन २४ तिष्ठेति वदन्नपर: पुरुषो हृदयान्निःसृत इति ३३
स्वनवदिति प्रहसन्नं क्रियाविशेषणं ३४ उग्रदंष्ट्राभि: क्षुण्णाशिरोधरा ग्रीवा येषां उग्रमिति क्रियावि

तस्यापतत एवाशु गदां चिच्छेद चंडिका खड्गेन निशितेन शरेण साच शूलं समाददे २१ शूलहस्तं तमायान्तं
निशुंभममरार्दनं हृदि विव्याध शूलेन वेगाविद्धेन चंडिका २२ भिन्नस्य तस्य शूलेन हृदयान्निःसृ
तोपर: महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् २३ तस्य निःक्रामतो देवी प्रहस्य स्वनवत्तत:
शिरश्चिच्छेद खड्गेन ततोसावपतद्भुवि २४ तत: सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरां
स्तांस्तथा काली शिवदूती तथापरान् ॥ २५ कौमारीशक्तिनिर्भिन्ना: केचिन्नेशुर्महासुरा: ब्रह्मा
णीमंत्रपूतेन तोयेनान्ये निराकृता: २६ माहेश्वरीत्रिशूलेन भिन्ना: पेतुस्तथापरे वाराहीतु
ण्डघातेन केचिच्चूर्णीकृता भुवि २७ खंडं खंडं च चक्रेण वैष्णव्या दानवा: कृता: वज्रेण चैन्द्री
हस्ताग्रविमुक्तेन तथापरे २८ केचिद्विनेशुरसुरा: केचिन्नष्टा महाहवात् भक्षिताश्चापरे
काली शिवदूती मृगाधिपै: २९ इति मार्कंडेयपुराणे देवीमाहात्म्ये निशुंभवध: ९

शिवदूतीका २५ निराकृता निरस्ता: २६ २७ २८ विनेशुर्हता: नष्टा इति अपरे गता: मृगाधिप
सिंह: २९ इति श्री श्रीपद्मनाभ[illegible] विरचितायां देवीमाहात्म्य तात्पर्यटीकायां
दुर्गाप्रबोधिन्यां निशुंभवध: ९

अट्टाट्टहासं शत्रुणां हासं अशिवं भीषणं तो त्रेसुरुद्विग्नाः २१ २२ २३ लोकत्रयस्य भूर्भुवस्वर्लक्षणस्यां
तरं मध्यं भुवर्लोकस्तिति यावत् निर्घातनिःस्वनः उत्पातध्वनिर्जितवान् अर्थात् शुम्भस्य सिंहनादं
इति बोद्धव्यं तेन तादृगप्यस्य सिंहनादेन निर्घातध्वनिनाऽभिभूतः इत्यसंकुलं अथवा तेन सिंहनादेन

अट्टाट्टहासमशिवं शिवदूती चकार ह ते शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ २१ दुरात्मंस्ति
ष्ठ तिष्ठेति व्याजहाराम्बिका यदा तदा जयेत्यभिहितं देवैराकाशसंस्थितैः २२ शुम्भेनागत्य याश
क्तिर्मुक्ता ज्वालातिभीषणा आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया २३ सिंहनादेन शुम्भस्य
व्याप्तं लोकत्रयान्तरं निर्घातनिःस्वनो घोरो जितवानवनीपते २४ शुम्भमुक्ताञ्छरान्देवी शुम्भस्त
त्प्रहितांश्छरान् चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः २५ ततः सा चण्डिका क्रुद्धा शूलेनाभि
जघान तं। स तदाभिहतो भूमौ मूर्च्छितो निपपात ह २६ ततो निशुम्भः संप्राप्य चेतनामात्तकार्मुकः
आजघान शरैर्देवीं कालीं केसरिणं तथा २७ पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः चक्रायुधेन
दितिजः छादयामास चण्डिकां २८ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी चिच्छेद तानि चक्रा
णि स्वशरैः सायकांश्च तान् २९ ततो निशुम्भो वेगेन गदामादाय चण्डिकां अभ्यधावत वै ह
न्तुं दैत्यसेनासमावृतः ३०

निर्घातनिःस्वनोऽपि जितवानभिभूतः कृशानि वारा कर्मणि कृतवान् २४ तत्प्रहितान् त्वया प्रेषितान् २५
मूर्च्छितो विचेतनः २६ आत्तं गृहीतं कार्मुकं येन २७ २८ दुर्गा दुर्गार्तिः आर्तिः पीडा अथ वा दुर्गे संकटे या

श्री चं. दी.

४९

जन्मनामवतारणम् २२ २३ शुभांमतिं मोक्षाभ्युदयसाधनं ज्ञानं प्रांतरे प्रारण्ये शून्ये मार्गे २४ शू
न्ये निर्जनप्रदेशे २५ क्रुद्धेनमचेतिसर्वत्र यद्ये वध्यो वधार्हः आघूर्णितः आकुलितः पोते नावि २६ २७

रक्षांकरोतिभूतेभ्यो जन्मनांकीर्तनंमम युद्धेषुचरितंयन्मे दुष्टदैत्यनिवर्हणं २२ तस्मिंस्तु ते वैरि
कृतंभयंपुंसांनजायते युष्माभिस्तुतयोयाश्चयाश्च ब्रह्मर्षिभिः कृताः २३ ब्रह्मणाचकृता
स्तास्तुप्रयच्छंतिशुभांमतिम् अरण्येप्रांतरेवापि दावाग्निपरिवारितः २४ दस्युभिर्वावृतः
शून्येगृहीतोवापिशत्रुभिः सिंहव्याघ्रानुयातोवा वनेवावनहस्तिभिः २५ राज्ञाक्रुद्धेनवा
ज्ञप्तो वध्यो बंधगतोपिवा आघूर्णितोवावातेन स्थितः पोतेमहार्णवे २६ पतत्सुचापिशस्त्रे
षुसंग्रामेभृशदारुणे सर्वबाधासुघोरासु वेदनाभ्यर्दितोपिवा २७ स्मरन्ममैतच्चरितं नरोमुच्ये
तसंकटात् ममप्रभावात्सिंहाद्या दस्यवोवैरिणस्तथा २८ दूरादेवपलायंते स्मरतश्चरितं
मम ऋषिरुवाच इत्युक्त्वासाभगवती चंडिकाचंडविक्रमा पश्यतामेवदेवानां तत्रैवांत
रधीयत तेपिदेवानिरातंकाः स्वाधिकारान्यथापुरा ३० यज्ञभागभुजः सर्वे चक्रुर्वि
निहतारयः ३१

संकटात् दुःखात् कर्मकर्तर्ययंप्रयोगः २८ २९ चंडो दारुणो विक्रमो यस्याः पश्यतामित्यनादरे षष्ठी
निरातंका निर्भयाः ३१

शोषद्दैत्यादुत्पन्नाः २२ २३ संभूयकार्यमादाय २४ विज्ञानं विशिष्टं ज्ञानं मोक्षदेयमित्यर्थः गृह
द्धि मे ध्वर्यं तुष्टि गृहद्धिमिति विवक्षा वक्षाद्विसंधिः व्याप्तं वै भवते २५ महतो बलदान पिकलाय
धर्मिकारे शुभ्रवनेयतीतिमहाकाली महाकाले महाप्रलये महामारी जनक्षयो महामारी संह

देशपाश्चदेवानि हते शुंभे देवरिपौ युधि जगाद्विध्वंसिके तस्मिन्महोग्रेतुलविक्रमे ३१ निशुंभे
च महावीर्ये शेषापातालमाययुः एवं भगवती देवी सानित्यापि पुनः पुनः ३२ संभूयकुरुते भू
पजगतः परिपालनं तयेतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ३३ साधाचिता च विज्ञानं तुष्टा
गृद्धिं प्रयच्छति व्याप्तं ययेतत्सकलं ब्रह्माण्डं मनुजेश्वरः ३४ महाकाल्या महाकाले महा
मारीस्वरूपया सैवकाले महामारी सैवसृष्टिर्भवत्यजा ३५ स्थितिं करोति भूतानां सैवकाले
सनातनी भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ३५ स्थितिं करोति भूतानां सैवकाले सना
तनी भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ३६ सैवाभावे तथालक्ष्मीर्विनाशायोपजायते
स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ३७

ति क्रिया तत्स्वरूपया काले ध्वंसपदार्थानां नाशके महतो ब्रह्मादीनपि मारयति महामारी अज
न्मरहिता ३६ काले स्थिति समये सनातनी विनाशहीना भवकाले संपत्समये वृद्धिप्रदेति ल
क्ष्मीविशेषणं ३७

धनप्रतं

विशि